# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – साहित्यम् (काव्यवर्गः)** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – नैषधीयचरितम् ४-५ सर्गौ** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः ससन्दर्भं व्याख्यां कुरुत ।**

१ अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।
अजनि पङ्गुरपाङ्गनिजाङ्गण-भ्रमिकणेऽपि तदीक्षण खञ्जनः ॥

२ ज्वलति मन्मथवेदनया निजे हृदि तयार्द्रमृणाललतार्पिता ।
स्वजयिनोस्त्रपया सविधस्पयोर्मलिनतामभजद्भुजयोर्भृशम् ॥

३ हृदयमाश्रयसे यदि मामकं ज्वलयसीत्थमनङ्ग तदेव किम् ।
स्वयमपि क्षणदग्धनिजेन्दनः क्व भवितासि हताश हुताशवत् ॥

४ हितगिरं न शृणोषि किमाश्रवे सहजयापदि धीरतयात्मनः ।
सखि हिता यदि मे भवसीदृशी मदरिमिच्छसि या मम जीवितम् ॥

**प्रश्नः २** दमयन्त्याः विरहव्यथां यथाग्रन्थं विविच्यताम् ।

**प्रश्नः ३** चतुर्थसङ्गस्य सारांशं यथाधीतं लिखत ।

**प्रश्नः ४** नैषधचरितस्य नायकस्य यथाग्रन्थं वर्णनं कुरुत ।

**प्रश्नः ५** सखीगणेन सह दमयन्त्याः संवादं समीक्षयत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः ससन्दर्भं व्याख्या कार्या ।**

१ वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि ।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरः सरमाख्यत् ॥

२ कापि कामपि बभाण बुभुत्सुं शृण्वति त्रिदशभर्तरि क्वचित् ।
एष कश्यपसुतामभिगन्ता पश्य कश्यपसुतः शतमन्युः ॥

३ पङ्कसङ्करविगर्हितमर्हं न श्रियः कमलमाश्रयणाय।
अर्थिपाणिकमलं विमलन्तद्वासवेश्म विदधीत सुधीस्तत्॥

४ अर्थितां त्वयि गतेषु सुरेषु म्लानदानजनितोरुयशःश्री।
अद्य पाण्डु गगनं सुरसारथी केवलेन कुसुमेन विधत्ताम्॥

प्रश्नः ७ नैषधीयचरितस्य नायिकायाः स्वसंस्कृतेन वर्णनं कुरुत।

प्रश्नः ८ पञ्चमसर्गस्य सारांशं यथाधीतं लिखत।

प्रश्नः ९ स्वयंवरविधिं ज्ञात्वा इन्द्रः किमकरोत् इति वर्णयत।

प्रश्नः १० इन्द्रनारदयोः संवादं यथाग्रन्थं लिखत।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत।**

१ राजा भीमसेनः कस्य देशस्य नृपतिः वर्तते ?
२ दमयन्त्याः पितुः नाम किम् ?
३ नैषधीयचरितस्योपजीव्यं किमस्ति ?
४ इन्द्रः स्वयंवरविधिं कस्माद् ज्ञातवान् ?
५ अस्मिन् 'पञ्चनली' पदेन के गृह्यन्ते ?
६ नैषधीयचरितस्य रचयिता कः ?
७ इन्द्रः केन सार्धं पृथ्वीं पफाण ?
८ इन्द्रादयः कं दूतरूपेण दमयन्त्याः समीपं प्रेषयन्ति ?
९ दमयन्ती समीपं नलस्य गुणगानं कः करोति ?
१० किं विद्वदौषधम् ?
११ नैषधीयचरितस्य कः प्रतिनायकः ?
१२ नैषधीयचरिते कति सर्गाः सन्ति ?
१३ नैषधीयचरितस्य नायकः कः ?
१४ श्रीहर्षस्य कति रचनाः सन्ति ?
१५ नैषधीयचरितस्य नायकः कीदृशः ?

****